# Shri Bagala Ashtottarashatanama Stotram

# श्रीबगलाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Bagala Ashtottarashatanamastotram 1

File name : bagalAShTottarashatanAmastotram1.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Description-comments : rudrayAmalatantra. See corresponding nAmAvalI

Latest update : December 26, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2022

*sanskritdocuments.org*

# श्रीबगलाष्टोत्तरशतनामस्तोत्रम्

ॐ ब्रह्मास्त्ररूपिणी देवी माता श्रीबगलामुखी ।
चिच्छिक्तिर्ज्ञानरूपा च ब्रह्मानन्दप्रदायिनी ॥ १॥

महाविद्या महालक्ष्मी श्रीमत्त्रिपुरसुन्दरी ।
भुवनेशी जगन्माता पार्वती सर्वमङ्गला ॥ २॥

ललिता भैरवी शान्ता अन्नपूर्णा कुलेश्वरी ।
वाराही छीन्नमस्ता च तारा काली सरस्वती ॥ ३॥

जगत्पूज्या महामाया कामेशी भगमालिनी ।
दक्षपुत्री शिवाङ्कस्था शिवरूपा शिवप्रिया ॥ ४॥

सर्वसम्पत्करी देवी सर्वलोक वशङ्करी ।
वेदविद्या महापूज्या भक्ताद्वेषी भयङ्करी ॥ ५॥

स्तम्भरूपा स्तम्भिनी च दुष्टस्तम्भनकारिणी ।
भक्तप्रिया महाभोगा श्रीविद्या ललिताम्बिका ॥ ६॥

मैनापुत्री शिवानन्दा मातङ्गी भुवनेश्वरी ।
नारसिंही नरेन्द्रा च नृपाराध्या नरोत्तमा ॥ ७॥

नागिनी नागपुत्री च नगराजसुता उमा ।
पीताम्बा पीतपुष्पा च पीतवस्त्रप्रिया शुभा ॥ ८॥

पीतगन्धप्रिया रामा पीतरत्नार्चिता शिवा ।
अर्द्धचन्द्रधरी देवी गदामुद्गरधारिणी ॥ ९॥

सावित्री त्रिपदा शुद्धा सद्योराग विवर्धिनी ।
विष्णुरूपा जगन्मोहा ब्रह्मरूपा हरिप्रिया ॥ १०॥

रुद्ररूपा रुद्रशक्तिश्चिन्मयी भक्तवत्सला ।
लोकमाता शिवा सन्ध्या शिवपूजनतत्परा ॥ ११॥

धनाध्यक्षा धनेशी च नर्मदा धनदा धना ।
चण्डदर्पहरी देवी शुम्भासुरनिबर्हिणी ॥ १२॥

राजराजेश्वरी देवी महिषासुरमर्दिनी ।
मधूकैटभहन्त्री देवी रक्तबीजविनाशिनी ॥ १३॥

धूम्राक्षदैत्यहन्त्री च भण्डासुर विनाशिनी ।
रेणुपुत्री महामाया भ्रामरी भ्रमराम्बिका ॥ १४॥

ज्वालामुखी भद्रकाली बगला शत्रुनाशिनी ।
इन्द्राणी इन्द्रपूज्या च गुहमाता गुणेश्वरी ॥ १५॥

वज्रपाशधरा देवी ज्वामुद्गरधारिणी ।
भक्तानन्दकरी देवी बगला परमेश्वरी ॥ १६॥

अष्टोत्तरशतं नाम्नां बगलायास्तु यः पठेत् ।
रिपुबाधाविनिर्मुक्तः लक्ष्मीस्थैर्यमवाप्नुयात् ॥ १७॥

भूतप्रेतपिशाचाश्च ग्रहपीडानिवारणम् ।
राजानो वशमायान्ति सर्वैश्वर्यं च विन्दति ॥ १८॥

नानाविद्यां च लभते राज्यं प्राप्नोति निश्चितम् ।
भुक्तिमुक्तिमवाप्नोति साक्षात् शिवसमो भवेत् ॥ १९॥

॥ श्री रुद्रयामले सर्वसिद्धिप्रद-
बगलाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

*Shri Bagala Ashtottarashatanama Stotram*

pdf was typeset on December 26, 2022

Please send corrections to *sanskrit@cheerful.com*